**काष्ठागार** न० काष्ठनिर्म्मितमागारम् । (काठेरघर) काष्ठनिर्म्मिते गृहे त्रिका० ।

**काष्ठाम्बुवाहिनी** स्त्री काष्ठनिर्म्मिताऽम्बुवाहिनी । (सेओति) ख्याते द्रोणीरूपे नौकाजलसेचनपात्रभेदे अमरः

**काष्ठालुक** न० काष्ठमिव कठिनमालुकम् । कन्दभेदे । “कन्दातन ऊर्द्ध्वं वक्ष्यामः विदारिकन्द-शता-वरी-विस-मृणाल-शृङ्गाटक-कशेरुक-पिण्डालुक-मध्वालुक-हस्त्यालुक काष्ठालुक-शङ्खालुक-रक्तालुकेन्दीवरोत्पल-कन्दप्रभृतीनि । रक्तपित्तहराण्याहुः शीतानि मधुराणि च । गुरूणि बहुशुक्राणि स्तन्यवृद्धिकराणि च” सुश्रुतः ।

**काष्ठिक** त्रि० काष्ठमस्त्यस्य ठन् । बहुकाष्ठयुक्ते अनले देशादौ “क्षुद्रं काष्ठं ङीप् काष्ठी स्वार्थे क ह्रस्वः टाप् । काष्ठिका क्षुद्रकाष्ठखण्डे स्त्री । “विंशति काष्ठिकाः”भवदेवः

**काष्ठिन्** त्रि० काष्ठमस्त्यस्य इनि । बहुकाष्ठयुक्ते स्त्रियां ङीप्

**काष्ठील** पु० काष्ठिना इल्यते इल—क्षेपणे कर्म्मणि घञ् । १राजार्कै राजनि० ईषद्दलीखेव । २कदलीभेदे (काठकला) शब्दचि०

**काष्ठेक्षु** पु० काष्ठमिव कठिनकाण्ड इक्षुः । इक्षुभेदे सुश्रु० इक्षुशब्दे ९०९पृ०विवृतिः । भावप्र० काण्डेक्षुरिति पाठः ।

**काष्ठोडुम्बरिका** स्त्री काष्ठप्रधाना उदुम्बरिका । काकोदुम्बरिकायाम् शब्दचि० ।

**कास** कुत्सित शब्दे (रोगहेतुकशब्दभेदे) भ्वा० आत्म० अक० सेट् । कासते अकासिष्ट कासाम्-बभूव-आस-चक्रे चकासे “असीतोरावणः कासाञ्चक्रे शस्त्रैर्निराकुलः”भट्टिः । “कासाञ्चक्रे कुत्सितशब्दमभिहितवान्” जयम० । “अतऊर्द्ध्वं प्रवक्ष्यामि धूमोपहतलक्षणम् । श्वसिति क्षौति चात्यर्थमत्याध्मति कासते” “स पूर्व्वं कासते शुष्कम्” सुश्रु० । “कासमानस्तृष्णाभिभूतः” सुश्रु० । अस्य क्वचित् परस्मैपदित्वमिच्छन्ति । “प्रसक्तवेगस्य समीरणेन कासेत्तु शुष्कं स्वरभेदयुक्तः”सुश्रु०कासशब्दे उदा०। क्विप् काः । “यस्त्वं शीतोऽथोरुडुरः सह कासा वेपथः” अथ० ५,२२,१०, भावे घञ् । कासः कुत्सितशब्दः “मुञ्च शीर्षक्त्या उत कासएनम्” अथ० १,१२,२ ।

**कास** त्रि० कस हिंसने कर्त्तरि ण । १हिंसके । कासतेऽनेन कास—करणे घञ् । २रोगभेदे पु० “कुरुया बलासं कासमुद्युगम्” अथ० ५,२२,११ । तल्लक्षणनिदानादि सुश्रुते उक्तं यथा

“अथातः कासप्रतिषेधमध्यायं व्याख्यास्यामः । उक्ता ये हेतवो नृणां रोगयोः श्वासहिक्कयोः । कासस्यापि च ते ज्ञेयास्त एवोत्पत्तिहेतवः । धूमोपघाताद्रजसस्तथैव व्यायामरूक्षान्ननिषेवणाच्च । विमार्गगत्वादपि भोजनस्य वेगावरोधात् क्षवथोस्तथैव । प्राणो ह्युदानानुगतः प्रदुष्टः संभिन्नकांस्यस्वनतुल्यघोषः । निरेति वक्त्रात्सहसा सदोषः कासः स विद्वद्भिरुदाहृतस्तु । स वातपित्तप्रभवः कफाच्च क्षतात्तथान्यः क्षयजोऽपरश्च । पञ्चप्रकारः कथितो भिषग्भिर्व्विवर्द्धितो यक्ष्मविकारकृत् स्यात् । भविष्यतस्तस्य तु कण्ठकण्ड्वर्भोज्योपरोधो गलतालुलेपः । स्वशब्दवैषम्यमरोचकोऽग्निसादश्च लिङ्गानि भवन्त्यमूनि । हृच्छङ्खमूर्द्धोदरपार्श्वशूली क्षामाननः क्षीणबलस्वरौजाः । प्रसक्तवेगस्य समीरणेन कासेत्तु शुष्कं स्वरभेदयुक्तः । उरोविदाहज्वरवक्त्रशोषैरभ्यर्द्दितस्तिक्तमुखस्तृषार्त्तः । पित्तेन पीतानि वमेत्कटूनि कासेत्स पाण्डुः परिदह्यमानः । विलिप्यमानेन मुखेन सीदन् शिरोरुगार्त्तः कफपूर्णदेहः । अभक्तरुग् गौरवसादयुक्तः कासेद्भृशं सान्द्रकफः कफेन । वक्षोऽतिमात्रं विहतञ्च यस्य व्यायामभाराध्ययनाभिघातैः । विश्लिष्टवक्षाः स नरः सरक्तं ष्ठीवत्यभीक्ष्णं क्षतजःस उक्तः । अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहैः । रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमावहेत् । स पूर्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम् । कण्ठेन रुजताऽत्यर्थं विभिन्नेनैव चोरसा । सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना । दुःखस्पर्शेन शूलेन भेदपीडाभितापिना । पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यपीडितः । पारावतइवाकूजन् कासवेगात् क्षतोद्भवात् । विषमाऽसात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात् । घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयो मलाः । कुपिताः क्षयजं कासं कुर्य्युर्देहक्षयप्रदम् । स गात्रशूलज्वरदाहमोहान् प्राणक्षयञ्चोपलभेत कासी । शुष्यन् विनिष्ठीवति दुर्ब्बलस्तु प्रक्षीणमांसो रुधिरं सपूयम् । तं सर्व्वलिङ्गं भृशदुश्चिकित्स्यं चिकित्सितज्ञाः क्षयजं वदन्ति । इत्थं त्वमासाद्य भवन्त्यथो वै याप्यन्नणाङ्कुर्भिषजस्तु कासम्” ।

भावप्र० एतद्विवृतं यथा

पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः । क्षयायोपेक्षिताः सर्वे बलिनश्चोत्तरोत्तरम् । क्षयाय राजयक्ष्मणे । अथ पूर्व्वरूपमाह । पूर्व्वरूपं भवेत्तेषां शूकपूर्णगलास्यता । कण्ठे कण्डूश्च भोज्यानामवरोधश्च जायते । भोज्यानामवरोधः कवलगिलने कण्ठव्यथा । अथ